देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकी वार्ता-पत्रिका

# रघुनाथवार्तावली

## ( संस्कृतगौरवविशेषाङ्कः )

चतुर्थवर्षम् ( अङ्काः 12,13,14 ) अप्रैल-जून, जुलाई-सितम्बर, अक्टूबर-दिसम्बर 2019




रघुनाथवार्तावली कृपया श्रीरघुनाथस्य प्रसरेत्।
दिशि दिशि प्रापयेदथ वार्ताः परिसरस्याभिनवाः।।

नानाविषयसम्बद्धाः नानारसपरिप्लुताः।
परिसरीयवार्तास्ताः वार्तावल्यां प्रकाशिताः।।

**प्रधानसम्पादकः**
प्रो. के.बी. सुब्बरायुडुः
( प्राचार्यः )

**सम्पादकौ**
प्रो. बनमालीबिश्वालः
डा. अनिलकुमारः

**लिपिचित्रसंयोजनम्**
श्रीनवीनकुमारः

‘रघुनाथवार्तावली’-सम्बद्धमभिप्रायम्, प्रकाशनयोग्याः कार्यक्रमवार्ताः च अधोलिखित-ई.मेल् सङ्केतेन प्रेषयन्तु-
srkvarta@gmail.com

परिसरस्य जालपुटेऽपि रघुनाथवार्तावली द्रष्टुं शक्यते-
website : www.srkcampus.org

देवप्रयागस्थ-श्रीरघुनाथकीर्तिपरिसरस्य त्रैमासिकी वार्तापत्रिका

**रघुनाथवार्तावली**

प्रकाशकः
राष्ट्रियसंस्कृतसंस्थानम्
**श्रीरघुनाथकीर्तिपरिसरः**
देवप्रयागः, पौडी-गढवालः
उत्तराखण्डः-249 301
(दूरभाषः - 01378-266028)
email : srkcampus@gmail.com
website : www.srkcampus.org

## पुरोवाक्



त्रैमासिक्या वार्तावल्या त्रयो अङ्काः (12-14) संयुक्तरूपेण प्रकाश्यन्ते इति प्रमोदावसरः परिसरस्य कृते। अयमङ्कः संस्कृतगौरवविशेषाङ्करूपेण प्रकाश्यते। यतो हि एतदवधौ परिसरे संस्कृतसप्ताह-महोत्सवः महतोत्साहेन सम्पालितः। अनेन विशेषाङ्कमाध्यमेन संस्कृतस्य गौरवमपि वितन्यते इत्यपरं वैशिष्ट्यं प्रस्तुताङ्कस्य। अत्र संस्कृतगौरव-सम्बद्धं साहित्यमपि प्रकाश्यते संस्कृतगौरवशतकमिति शीर्षकेण। एवमस्मिन्नङ्के अन्ये च समे स्थायिनः स्तम्भाः यथायोग्यं प्रकाशिताः सन्ति। एतदवधौ परिसरे सम्पन्नं सर्वं वृत्तजातमपि अस्मिन्नङ्के प्रकाशितमस्ति। अतः तत्तत्कार्यक्रमसंयोजकाः एतदर्थं धन्यवादार्हाः। अन्ते च एतस्य संयुक्ताङ्कस्य सफलसम्पादनार्थं सम्पादकौ प्रो. बनमाली बिश्वालः डॉ. अनिलकुमारश्च अभिनन्द्येते।

**के.बी. सुब्बरायुडुः**
प्राचार्यः, श्रीरघुनाथकीर्तिपरिसरः, देवप्रयागः

## प्रतिस्पन्दः




सुहृदा प्रो. बनमालीबिश्वालेन श्रीरघुनाथवार्तावल्याः एकादशाङ्कः (भारतीयसेनासपर्याविशेषाङ्कः) उपहृतः। परिसरीय विविधवृत्तजातैः विशिष्य शोधसङ्गोष्ठी-सम्बद्धाभिः वार्ताभिश्च सुसज्जितोऽयम् अङ्कः नितरां हृद्यः। साहित्यखण्डे प्रकाशितं समग्रं साहित्यं विशिष्य ‘तस्मै हुतातमने नमः’ इति काव्यं सहृदयमनांसि रञ्जयितुं नितरां समर्थमस्ति। अस्य अङ्कस्य सम्पादनार्थं सम्पादकौ प्रो. बनमालीबिश्वाल-डा. प्रफुल्लगडपालमहोदयौ अभिनन्दनीयौ।

विनूतनेऽस्मिन् परिसरे नियमितरूपेण वार्तावल्याः प्रकाशनं परिसरीयविदुषां शैक्षिकीं प्रतिबद्धतां रेखाङ्कयति। वर्धतामियं रघुनाथवार्तावली इति कामयमानो विरमामि।

शुभेच्छुः
**डॉ. निरञ्जनमिश्रः**
श्रीभगवानदास-आदर्श
संस्कृतमहाविद्यालयः, हरिद्वारम्

## सम्पादकीयम्

परिसरः प्रविष्टोऽस्ति चतुर्थेऽब्दे सगौरवम् ।
वार्ताश्चतुर्थवर्षस्य प्रकाश्यन्ते यथार्थतः। 1।

प्रस्तुतस्समवेताङ्कश्चाङ्कत्रयसमन्वितः ।
नवीनोऽयं विशेषाङ्को वार्तावल्या निवेद्यते।2।

द्वादशाङ्कसमारम्भः त्रयोदशाङ्कमध्यमः ।
चतुर्दशाङ्क-पर्यन्तो विशेषाङ्को विशिष्यते।3।

प्रस्तुत-विशेषाङ्कोऽयं संस्कृतगौरवाभिधः ।
संस्कृतोत्सव-वार्ताश्च प्रकाशिताः समासतः।4।

संस्कृतगौरवञ्चात्र शतश्लोकैश्च वर्णितम् ।
संस्कृतं सिद्धमेवं हि समाजस्योपकारकम् ।5।

स्पर्धाश्चायोजिता नैकाः संस्कृति-संस्कृताधृताः।
विजेतारस्समे तत्र यथायोग्यं पुरस्कृताः।6।

वार्षिकोत्सववार्ताऽत्र प्रामुख्येन प्रकाशिता।
तत्र पुरस्कृतानाञ्च विवरणं विशिष्यते।7।

राज्यस्तरीयस्पर्धाया विवरणं समङ्कितम्।
नाट्योत्सवस्य वार्ताश्च सचित्रं हि समुद्धृताः।8।

हिन्दीपक्षीयवार्ताश्च यथायोग्यं प्रकाशिताः।
अन्य-कार्यक्रमाणाञ्च वार्ताः प्रकाशिताः समाः।9।

पत्रिकाणां वैशिष्ट्यञ्च समयेन प्रकाशनम्।
क्षिन्तव्याश्च वलम्बाय सम्पादकाः प्रकाशकाः।10।

-सम्पादकाः

## परिसर-प्रकाशनानि लोकाय अर्पितानि



शाब्दीत्रिपथगाया द्वितीयाङ्कः बौद्धवैयाकरणविशेषाङ्कः लोकाय अर्प्यते

परिसरे सम्पालितस्य संस्कृतसप्ताह-महोत्सवस्य सम्पूर्ति-समारोहे कानिचन परिसर-प्रकाशनानि लोकाय अर्पितानि। एतदवसरे व्याकरणविभागीय-पत्रिकायाः शाब्दी त्रिपथगायाः द्वितीयाङ्कः बौद्धवैयाकरणविशेषाङ्कः लोकाय अर्पितः। एवमेव वार्तावल्याः एकादशाङ्कोऽपि भारतीय-सेना-सपर्या-विशेषाङ्करूपेण लोकार्पितः। परिसर-प्राचार्यस्य प्रो. प्रो. के.बी. सुब्बारायुडु-महोदयस्य सद्यः प्रकाशित पुस्तकं श्रीसद्गुरुमहिमामृतम् अपि लोकाय अर्पितम्। अतः अभिनन्द्यन्ते सर्वे सम्बद्धाः सम्पादकाः लेखकाश्च।



रघुनाथवार्तावल्या एकादशोऽङ्कः लोकाय अर्प्यते



श्रीसद्गुरुमहिमामृतं लोकाय अर्प्यते

## श्रीरघुनाथाकीर्तिपरिसरे वार्षिकोत्सवः समायोजितः



वार्षिकप्रतिवेदनं प्रस्तुवन् प्रो.बनमालीबिश्वालः

राष्ट्रियसंस्कृतसंस्थानाधीनस्थस्य श्रीरघुनाथाकीर्तिपरिसरस्य स्थापना अप्रैलमासस्य 16 दिनाङ्के सञ्जाता आसीत्। तदर्थम् अस्मिन् वर्षे परिसरेणानेन स्वतृतीयो वार्षिकोत्सवोऽमन्देनानन्देन 16.04.2019 दिनाङ्के परिपालितः यस्य चोद्घाटनं वैदिकलौकिकमङ्गलाचरणेन प्रदीपप्रज्वालनेन चाभवत्। न्यायशास्त्रनिष्णातस्य प्राध्यापकस्य डा.आर.बाल. मुरगनमहोदयस्य स्वागतभाषणानन्तरं, प्राचार्यवर्यस्य समेषामतिथीनां कृते सम्मानप्रदानमद्भुतं मनोहरञ्चासीत्। एतदवसरे व्याकरणविभागाध्यक्षः प्रो. बनमालीविश्वालः पावरपाइंटद्वारा वार्षिकप्रतिवेदनं संस्कृतभाषया प्रस्तुतवान्। अस्मिन्नवरे श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य कुलपतयः प्रो.रमेशकुमारपाण्डेयमहोदया मुख्यातिथिरूपेण, तत्रत्या एव शोधविभागाध्यक्षा डा. शंकरमिश्रमहोदयाः तथा उत्तराखण्डसंस्कृतविश्वविद्यालयस्य कुलपतयः प्रो. देवीप्रसादत्रिपाठीमहोदयः समुपस्थिता आसन्। डा. प्रफुल्लगडपालस्य धन्यवादज्ञापनं यथा रमणीयमाकर्णितम् तथैव डा.नीतेशकुमारद्विवेदिनः सञ्चालनकौशलमपि हृदयाह्लादकमवलोकितम्। उत्सवेऽस्मिन् विविधाः सांस्कृतिकस्पर्धाकार्यक्रमा आयोजिता अभवन् येषु मुख्यतया एकलगान-समूह-गीत-संस्कृतभाषण-हिन्दीभाषण-स्फूर्तिप्रतियोगिताश्च प्रमुखा आसन्। सांस्कृतिकस्पर्धाकार्यक्रमाणां पुरस्कारवितरणे डा. दिनेशचन्द्रपाण्डेयस्य, क्रीडास्पर्धापुरस्कारवितरणे च श्रीविजेन्द्रबिष्टस्य भूमिका विशिष्टैवासीत्। एवं वार्षिकोत्सवेऽस्मिन् आयोजिता आसन् विविधाः स्पर्धाः यासु च सर्वे छात्राः सोत्साहं भागं गृहीतवन्तः। तत्र पुरस्कृतानां विवरणमित्थं वर्तते-



प्राचार्याणां सम्माननं कुर्वन् प्रो.बनमालीबिश्वालः



वार्षिकोत्सवे पुरस्कारं स्वीकुर्वत्यौ प्रतिभागिन्यौ

### वार्षिकोत्सवे पुरस्कृतानां विजेतॄणां विवरणम्

**संस्कृत-एकल-गानम्**

तृतीयं स्थानम् - अतुलध्यानी, शास्त्रीप्रथमवर्षम्
द्वितीयं स्थानम् - अशोककुमारः, शास्त्रीप्रथमवर्षम्
प्रथमं स्थानम् - शोभिनौटियालः, शास्त्रीप्रथमवर्षम्

**संस्कृत-समूह-गानम्**

तृतीयं स्थानम् - शोभिनौटियालः, शास्त्रीद्वितीयवर्षम्
शुभमभट्टः, शास्त्रीप्रथमवर्षम्
नितिनरतूडी, शास्त्रीप्रथमवर्षम्
द्वितीयं स्थानम् - रोहितशर्मा, आचार्यद्वितीयवर्षम्
बालकृष्णः, आचार्यद्वितीयवर्षम्
प्रथमं स्थानम् - दुर्गेशप्रसादः, शास्त्रीतृतीयवर्षम्
अशोककुमारः, शास्त्रीद्वितीयवर्षम्
प्रियंकाजगूडी, शास्त्रीद्वितीयवर्षम्
रचनाबहुगुणा, शास्त्रीद्वितीयवर्षम्

**संस्कृतभाषणस्पर्धा-**

द्वितीयं स्थानम् - प्रियंकाजगूडी, शास्त्रीद्वितीयवर्षम्
प्रथमं स्थानम् - बालकृष्णसेमवालः, आचार्यद्वितीयवर्षम्

**हिन्दीभाषणस्पर्धा-**

तृतीयं स्थानम् - रचनाबहुगुणा, शास्त्रीद्वितीयवर्षम्
द्वितीयं स्थानम् - विकासकाला, शास्त्रीद्वितीयवर्षम्
प्रथमं स्थानम् - प्राचीनौटियालः, शास्त्रीतृतीयवर्षम्

**स्फूर्तिस्पर्धा -**

तृतीयं स्थानम् - सन्दीपकोठारी, शास्त्रीद्वितीयवर्षम्
विकासकाला, शास्त्रीद्वितीयवर्षम्
द्वितीयं स्थानम् - रोहितशर्मा, आचार्यद्वितीयवर्षम्
बालकृष्णसेमवालः, आचार्यद्वितीयवर्षम्
प्रथमं स्थानम् - प्राचीनौटियालः, शास्त्रीतृतीयवर्षम्
श्यामदेवः, शास्त्रीतृतीयवर्षम्

**निर्णायकाः-** उपर्युक्तासु चासु वार्षिकोत्सव-स्पर्धासु निर्णायकानां विवरणम् अधोलिखितम् - डा. प्रफुल्लगडपाल-डा.अरविन्दगौर-डा. दिनेशचन्द्रपाण्डेयाः एकलगानस्पर्धायां तथा डा. कृपाशङ्करशर्म-डा. विरेन्द्रबर्त्वाल-डा.शैलेन्द्रप्रसादउनियालाश्च समूहगानस्पर्धायां निर्णायकाः आसन्। अनयोः स्पर्धयोः सञ्चालनं डा.दिनेशचन्द्रपाण्डेयेन कृतमासीत्। संस्कृतभाषणस्पर्धायां डा.आर.बालमुरगन-डा.नितेशद्विवेदौ निर्णायकावास्ताम्, सञ्चालकश्चासीत् श्रीश्रीओमशर्मा। संस्कृतभाषणस्य विषयः 'भारतीसंस्कृतेः उपादेयता वर्तमाने तत्स्वरूपञ्च' निर्धारितः आसीत् हिन्दीभाषणस्पर्धायां निर्णायकाश्चाभवन् प्रो.बनमालीबिश्वाल-डा.आर.बालमुरगन-डा. कृपाशङ्करशर्म- डा. प्रफुल्लगडपालाश्च। एवं संस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरस्य वार्षिकोत्सवो हर्षोल्लासपूर्वकं परिपालितः।

## परिसरे योगदिवसः समायोजितः

मानवसंसाधनविकासमन्त्रालयस्य भारतसर्वकारस्य निर्देशानुसार राष्ट्रियसंस्कृतसंस्थानाङ्गभूतेन श्रीरघुनाथकीर्तिपरिसरेण जूनमासस्य 21 दिनाङ्के प्रातः 10:15 वादने अन्ताराष्ट्रिययोगदिवसस्यायोजनं कृतम्। अवसरेऽस्मिन् सरस्वत्या आराधनयाऽस्य कार्यक्रमस्योद्घाटनं परिसरस्य प्राचार्यैः तथा पतञ्जलियोगपीठस्य मुख्याभिः सुश्रीबिन्दुभिः कृतम्। अत्र वैदिकमङ्गलाचरणं श्रीश्रीओमशर्मणा, सञ्चालनञ्च डा. कृपाशङ्करशर्मणा विहितम्। मुख्यवक्तृत्वेनोपस्थिताभि र्योगप्रशिक्षिकाभिः सुश्रीबिन्दुभिः वर्तमानकाले योगस्य किं महत्त्वं का च प्रासङ्गिकता इत्यस्मिन् विषये स्वविचाराः प्रस्तुताः तथा च विशिष्य 'योगश्चित्तवृत्तिनिरोधः' इत्यस्य सूत्रस्य व्याख्याऽपि कृता। पतञ्जलियोगविद्यापीठात् समागतैः छात्रैः परिसरस्य सर्वेषां कर्मचारिणां योगाभ्यासः कारितः। अध्यक्षत्वेन विद्यमानाः परिसरप्राचार्यमहोदया योगस्य विश्वव्यापकताविषये छात्रान् अध्यापकान् चोद्बोधितवन्तः। अन्ते च श्रीसम्पूर्णानन्दनौटियालस्यानुभागाधिकारिणो धन्यवादज्ञापनेन कार्यक्रमस्य सम्पूर्तिः सञ्जाता।



योगासनं प्रदर्शयन् परिसरीयश्छात्रः

## सोत्साहेन परिपालितः स्वतन्त्रतादिवसः



ध्वजमुत्तोलयन्तः प्राचार्याः अतिथयश्च

भारतदेशस्य स्वतन्त्रतोत्सवो यथा सम्पूर्णराष्ट्रे हर्षोल्लासेन मन्यते तथैव प्रतिवर्षमत्र श्रीरघुनाथकीर्तिपरिसरेऽपि । एवमस्मिन् वर्षेऽपि द्विसप्ततितमोऽयं स्वतन्त्रतादिवसः महतोल्लासेन समाचरितः। श्रीरघुनाथकीर्तिपरिसरस्य प्राणभूतेन प्राचार्येणावसरेऽस्मिन् राष्ट्रध्वज उत्तोलितः तथा राष्ट्रसेवायै च सर्वे उद्बोधिताः। कथमस्माकं वीरसेनानिनः स्वदेशस्य कृते स्वप्राणान् त्यक्तवन्तः इत्यस्मिन् विषये तैरालोकपातः कृतः। राष्ट्रियपर्वण्यस्मिन् परिसरस्यानेकैश्छात्रैः राष्ट्रभक्तिपूर्णाः स्वविचाराः प्रकटिताः, बहुभिश्छात्रैश्च संगीतमयानि राष्ट्रभक्तिगीतान्यपि प्रस्तुतानि। केचित्स्वरचितदेशभक्तिपरकाणी काव्यान्यपि पठितवन्तः। अवसरेऽस्मिन् परिसरस्याध्यापकैरपि छात्रा उद्बोधिताः। तत्र व्याकरणविभागस्य प्रो. बनमालीबिश्वाल-डा. नितेशद्विवेद-श्रीश्रीओमशर्माणः, साहित्यविभागस्य डा. कृपाशङ्करशर्म-डा.प्रफुल्लगडपाल-डा.दिनेशपाण्डेयाः, वेदविभागस्य डा.शैलेन्द्रप्रसादउनियालः, न्यायविभागस्य डा.आर.बाल.मुरगन्महोदयः, ज्योतिषविभागस्य डा.सुरेशशर्मा, आधुनिकविभागस्य डा.अरविन्दगौर-डा.वीरेन्द्रबर्त्वाल-डा.अवधेशचन्द्रबिजल्वाणाश्चोपस्थिता आसन्। एवं देवप्रयागस्थेन श्रीरघुनाथकीर्तिपरिसरेण स्वराष्ट्रस्य स्वातन्त्र्यदिवसोत्सवः आनन्दोल्लासेन पालितः।



## एकं भारतं श्रेष्ठभारतम्

राष्ट्रियसंस्कृतसंस्थानस्यास्मिन् श्रीरघुनाथकीर्तिपरिसरे अवर-सचिव-मानवसंसाधन-विकासमन्त्रालय-भारतसर्वकारस्य निर्देशेन नवम्बरमासस्य 19 दिनांके एकं भारतं श्रेष्ठं भारतमित्यस्मिन् विषये कार्यक्रमस्यैकं प्रारूपं निर्मितम् यच्च दिसम्बरमासस्य 05 दिनाङ्के राष्ट्रियसंस्कृतसंस्थानस्य मुख्यालये अग्रीमकार्यान्वयनार्थं प्रेषितम्।

# संस्कृतसप्ताहोत्सवः



सम्मान्यन्ते विशिष्टातिथयः

प्रतिवर्षं श्रावणीपूर्णिमायामखिले भारतवर्षे सर्वेषु शैक्षणिकसंस्थानेषु संस्कृतसप्ताहस्यायोजनं क्रियते। राष्ट्रियसंस्कृतसंस्थानस्य देवप्रयागस्थे श्रीरघुनाथकीर्तिपरिसरे अगस्तमासस्य 16 दिनाङ्कात् 22 दिनाङ्कं यावत्संस्कृतसप्ताहोत्सवस्यायोजनं महतोल्लासेन विहितम्। तदर्थं प्राचार्यस्यादेशेन कार्यालयपत्रानुसारेण चअगस्तमासस्य द्वितीये दिनांके विभिन्नाः समितयः विनिर्मिताः। अस्य कार्यक्रमस्योद्घाटनावसरे विशिष्टातिथिरूपेण श्रीबद्रीविशालदासः, मुख्यातिथिरूपेण श्रीनवीनमहोदयः (नगरप्रचारकः), अध्यक्षरूपेण श्रीरघुनाथकीर्तिपरिसरस्य प्राचार्याः प्रो.के.बी. सुब्बारायुडुमहोदया उद्बोधितवन्तः। श्रीबद्रीविशालमहोदयः संस्कृतभाषाया महत्त्वविषये सर्वान् छात्रान् उद्बोधयन् अकथयत्- संस्कृतभाषा सर्वासां भाषाणां जननी वर्तते। संस्कृतादेवोद्गताः सन्ति सर्वा भाषाः। अस्माकं प्राचीनग्रन्थाः अस्यामेव भाषायां निबद्धा सन्ति। भारतीयसंस्कृतिरपि अत्रैव सन्निहिता वर्तते। अतः अस्या भाषायाः संरक्षणम् अस्माकं सर्वेषां कर्त्तव्यमस्ति। मुख्यातिथित्वेन विद्यमानेन श्रीनवीनमहोदयेन संस्कृताध्ययनेन कथं व्यक्तित्वस्य विकासो भवतीत्यस्मिन् विषये स्वविचाराः प्रकटिताः। अध्यक्षरूपेण विराजमानः श्रीरघुनाथकीर्तिपरिसरस्य प्राचार्यः छात्रान् सम्बोधयन् उक्तवान् यद्यथा संस्कृतस्याभ्युदयः स्यात् तदर्थम् अस्माभिः प्रयत्नः करणीयः।



स्वागतभाषणम् प्रस्तुवन् प्रो.बनमालीबिश्वालः



अध्यक्षीयमुद्बोधयन् परिसर-प्राचार्यः

संस्कृतसप्ताहमहोत्सवस्य सम्पूर्तिसत्रे हरिद्वारात् सम्प्राप्तौ स्वामिनौ मुख्यातिथिविशिष्टातिथिरूपेण उद्बोधितवन्तौ। परिसरीयः प्राचार्यश्च अध्यक्षीयमुद्बोधनं प्रस्तुतवान्। अवसरेऽस्मिन् समायोजिताः संस्कृत-एकलगान-संस्कृतसमूहगान-संस्कृतभाषण-श्रीमद्भगवद्गीता-श्लोककण्ठपाठ-निबन्धलेखन प्रतियोगिताः। एतासु प्रतियोगितासु विभिन्नेभ्यः संस्थानेभ्यः छात्रा भागं गृहीतवन्तः। परिणामस्वरूपेण येऽपि प्रथमं द्वितीयं तृतीयं च स्थानं प्राप्तवन्तस्तेषां विवरणमेवं विद्यते-









# संस्कृतसप्ताहोत्सवे पुरस्कृतानां विजेतॄणां विवरणम्

### संस्कृतएकलगानम्

| छात्रनाम | परिसरः/ विद्यालयः / महाविद्यालयः | स्थानम् |
|---|---|---|
| ध्रुवजोशी | श्रीरघुनाथकीर्तिपरिसरः | प्रथमम् |
| अशोककुमारः | श्रीरघुनाथकीर्तिपरिसरः | द्वितीयम् |
| भावेशः | श्रीरघुनाथकीर्तिपरिसरः | तृतीयम् |

### संस्कृतसमूहगानम्

| छात्रनाम | परिसरः/ विद्यालयः / महाविद्यालयः | स्थानम् |
|---|---|---|
| शुभमभट्टगणः | श्रीरघुनाथकीर्तिपरिसरः | प्रथमम् |
| खुशीगणः | पतञ्जलिगुरुकुलम् | द्वितीयम् |
| अन्यगणः | राजकीयमाध्यमिकविद्यालयः -2 | तृतीयम् |

### संस्कृतभाषणम् ( कक्षा 6तः8पर्यन्तम् )

| छात्रनाम | परिसरः/ विद्यालयः / महाविद्यालयः | स्थानम् |
|---|---|---|
| दीक्षा | पतञ्जलिगुरुकुलम् | प्रथमम् |
| ज्ञानश्रीः | पतञ्जलिगुरुकुलम् | द्वितीयम् |
| खुशी | पतञ्जलिगुरुकुलम् | तृतीयम् |

### संस्कृतभाषणम् ( कक्षा 9तः12पर्यन्तम् )

| छात्रनाम | परिसरः/ विद्यालयः / महाविद्यालयः | स्थानम् |
|---|---|---|
| दीपकनौटियालः | श्रीरघुनाथकीर्तिपरिसरः | प्रथमम् |
| मोहितशर्मा | श्रीरघुनाथकीर्तिपरिसरः | द्वितीयम् |

### श्लोककण्ठपाठः ( श्रीमद्भगवद्गीतायाः पञ्चदशोऽध्यायः )

| छात्रनाम | परिसरः/ विद्यालयः / महाविद्यालयः | स्थानम् |
|---|---|---|
| अमनभट्टः | श्रीरघुनाथकीर्तिआदशमहाविद्यालयः | प्रथमम् |
| सावित्री | पतञ्जलिगुरुकुलम् | प्रथमम् |
| नन्दिनी | पतञ्जलिगुरुकुलम् | द्वितीयम् |
| ईशिता | पतञ्जलिगुरुकुलम् | तृतीयम् |

### श्लोककण्ठपाठः ( श्रीमद्भगवद्गीतायाः षोडशोऽध्यायः )

| छात्रनाम | परिसरः/ विद्यालयः / महाविद्यालयः | स्थानम् |
|---|---|---|
| दीपकनौटियालः | श्रीरघुनाथकीर्तिपरिसरः | प्रथमम् |
| अवनीशः | श्रीरघुनाथकीर्तिपरिसरः | द्वितीयम् |

### श्लोककण्ठपाठः ( शिशुपालवधम् )

| छात्रनाम | परिसरः/ विद्यालयः/महाविद्यालयः | स्थानम् |
|---|---|---|
| दीपकनौटियालः | श्रीरघुनाथकीर्तिपरिसरः | प्रथमम् |
| श्यामदेवः | पतञ्जलिगुरुकुलम् | द्वितीयम् |

### संस्कृतभाषणम् (शास्त्रीतः आचार्यकक्षापर्यन्तम्)

| छात्रनाम | परिसरः /विद्यालयः /महाविद्यालयः | स्थानम् |
|---|---|---|
| श्यामदेवः | श्रीरघुनाथकीर्तिपरिसरः | प्रथमम् |
| आयुषउनियालः | श्रीरघुनाथकीर्तिपरिसरः | द्वितीयम् |
| हिमांशुपन्तः | श्रीरघुनाथकीर्तिपरिसरः | तृतीयम् |

### निबन्धलेखनम् ( पारम्परिकं 6तः 10कक्षापर्यन्तम् )

| छात्रनाम | परिसरः/विद्यालयः/महाविद्यालयः | स्थानम् |
|---|---|---|
| शुभाङ्गिनी | पतञ्जलिगुरुकुलम् | प्रथमम् |
| अङ्किता | पतञ्जलिगुरुकुलम् | द्वितीयम् |
| ज्योतिः | पतञ्जलिगुरुकुलम् | तृतीयम् |

### निबन्धलेखनम् ( 11तः 12कक्षापर्यन्तम् )

| छात्रनाम | परिसरः/विद्यालयः/महाविद्यालयः | स्थानम् |
|---|---|---|
| राजीवडोभालः | श्रीरघुनाथकीर्तिआदशमहाविद्यालयः | प्रथमम् |
| दीपकनौटियालः | श्रीरघुनाथकीर्तिपरिसरः | द्वितीयम् |
| मोहितशर्मा | श्रीरघुनाथकीर्तिपरिसरः | तृतीयम् |

### निबन्धलेखनम् ( शास्त्रीतः आचार्यपर्यन्तम् )

| छात्रनाम | परिसरः/विद्यालयः/महाविद्यालयः | स्थानम् |
|---|---|---|
| श्यामदेवः | श्रीरघुनाथकीर्तिपरिसरः | प्रथमम् |
| सन्दीपकोठारी | श्रीरघुनाथकीर्तिपरिसरः | द्वितीयम् |
| प्रियंका | श्रीरघुनाथकीर्तिपरिसरः | तृतीयम् |

अन्येषां प्रतियोगिनां कृते सन्त्वनापुरस्कारा अपि प्रदत्ता आसन्। अनेन न केवलं संस्कृतस्य प्रचारो जातः, अपितु संस्कृतज्ञानां कृतेऽपि उत्साहप्रदः कार्यक्रमोऽयमभवत्। एवं प्रकारेण संस्कृतसप्ताहोत्सवः श्रीरघुनाथकीर्तिपरिसरेण सोल्लासं समायोजितः।




## पुरस्कारदृश्यावली






## श्रीरघुनाथाकीर्तिपरिसरेण समाचरितः हिन्दीपक्षोत्सवः




हिन्दीपक्षोत्सवस्य किञ्चन चित्रम्

हिन्दीभाषा अस्माकं राष्ट्रभाषा वर्तते। यान्यपि कार्याणि भारतसर्वकारस्य भवन्ति तानि सर्वाणि हिन्दी-आङ्गलभाषाभ्यां संपादितानि भवन्ति। अतः सर्वेषु भारतसर्वकारस्य कार्यालयेषु हिन्दीपक्षोत्सवस्योपरि विविधा कार्यक्रमाः आयोज्यन्ते। राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरेऽपि प्रतिवर्षमिवास्मिन् वर्षे अस्य हिन्दीपक्षस्यायोजनं सितम्बरमासस्य १४ दिनाङ्कात् २८ दिनाङ्कं यावदभवत्। परिसरस्य प्राचार्यैः विषयेऽस्मिन् एका समितिः निर्मिता यत्र आयोज्यमानानां कार्यक्रमाणां संयोजकः प्रो.बनमालीबिश्वालः, सहसंयोजकः डा.वीरेन्द्रबर्त्वालः तथा सदस्यत्वेन च डा. शैलेन्द्रप्रसादउनियाल-डा.विजेन्द्रविष्टाश्चोपस्थिता आसन्। कार्यक्रमस्योद्घाटनावसरे सम्मानितातिथित्वेन मुख्यातिथित्वेन च डा. जयन्तीप्रसादनौटियालः (महानिदेशकः, वैश्विकहिन्दीशोधसंस्थान देहरादूनम्), धनसिहंरावतः (उच्चशिक्षाराज्यमन्त्री), पत्रकारः प्रभाकरजोशी, आचार्यगिरिराजशर्मा चेत्यादयः कार्यक्रमस्य शोभां वर्धितवन्तः। प्रो.बनमालीबिश्वालमहोदयः हिन्दीभाषायाः व्यावहारिकपक्षमुपस्थापयन् अवदत् यत् भारताद्बहिरपि हिन्दीभाषां जनाः ज्ञातुमिच्छन्ति तथा चोत्साहपूर्वकं भाषन्ते, अतः अस्माभिरपि हिन्दीभाषायाः प्रयोगकौशलं ज्ञातव्यम्। डा.जयन्तीप्रसादनौटियालमहोदयाः हिन्दीभाषायाः वैश्विकस्तरे कीदृक् स्वरूपमस्ति इति तत् प्रस्तुतवन्तः। राज्यकार्येषु हिन्दीभाषायाः महत्त्वं सामान्यजनेषु तदुपयोगिता च इत्यस्मिन् विषये स्वविचाराः धनसिहंरावतमहोदयेन प्रकटिताः। पत्रकारितायां कथं हिन्दीभाषाया अपूर्वं योगदानं विद्यते तथा च आजीविकायाः साधनं हिन्दीभाषाऽपि भवितुमर्हति इत्येते विचाराः आसन् पत्रकारस्य प्रभाकरजोशीमहोदयस्य। आचार्यगिरिराजशर्मणा चाद्बोधिताश्छात्राः भक्तिपरकसाहित्येन। अन्ते च परिसरस्य प्राचार्येण हिन्दीसंस्कृतयोरन्तःसम्बन्धविषये स्वविचाराः प्रकटिताः। अवसरेऽस्मिन् विविधा कार्यक्रमा आयोजिताः येषु कार्यक्रमेषु सर्वे छात्राः प्राध्यापकाः कर्मचारिणश्च सोत्साहं भागं गृहीतवन्तः। एतद्वसरे आयोजितानां प्रतियोगितानां परिणामश्चैवमत्र प्रस्तूयते–




पुरस्कारं स्वीकुर्वत्यः प्रतिभागिन्यः




पुरस्कारं स्वीकुर्वन् प्रतिभागी

## हिन्दीपक्षोत्सवे पुरस्कृतानां विजेतृणां विवरणम्

**काव्यपाठः**

| स्थानम् | स्पर्धार्थिनाम | संस्थानाम |
|---|---|---|
| प्रथमम् | डा.वीरेन्द्रसिंहबर्त्वालः | श्रीरघुनाथकीर्तिपरिसरः |
| द्वितीयम् | डा.नीतेशकुमारद्विवेदः | श्रीरघुनाथकीर्तिपरिसरः |
| तृतीयम् | श्रीश्रीओमशर्मा | श्रीरघुनाथकीर्तिपरिसरः |
| चतुर्थम् | डा. दिनेशचन्द्रपाण्डेयः | श्रीरघुनाथकीर्तिपरिसरः |

(अस्मिनवसरे निर्णायकेष्वन्यतमः प्रो. बनमाली बिश्वालोऽपि हिन्दीभाषया काव्यपाठं कृतवान्)

**श्रुतलेखः**

| | | |
|---|---|---|
| प्रथमम् | श्रीराजेन्द्रसिंहः | श्रीरघुनाथकीर्तिपरिसरः |
| द्वितीयम् | श्रीविजयनेत्रवालः | श्रीरघुनाथकीर्तिपरिसरः |
| तृतीयम् | श्रीनवीनकुमारः | श्रीरघुनाथकीर्तिपरिसरः |
| चतुर्थम् | श्रीअंकितथलासी | श्रीरघुनाथकीर्तिपरिसरः |

**निबन्धलेखनम् ( वरिष्ठवर्गः )**

| | | |
|---|---|---|
| प्रथमम् | श्रीप्रवीणचमोली | श्रीरघुनाथकीर्तिपरिसरः |
| द्वितीयम् | श्रीसन्दीपकोठारी | श्रीरघुनाथकीर्तिपरिसरः |
| तृतीयम् | श्रीदेवेशकुमारः | श्रीरघुनाथकीर्तिपरिसरः |
| चतुर्थम् | श्रीदुर्गेशप्रसादः | श्रीरघुनाथकीर्तिपरिसरः |

**निबन्धलेखनम् ( कनिष्ठवर्गः )**

| | | |
|---|---|---|
| प्रथमम् | सुश्रीमोनिकानौगैन | सरस्वतीविद्यामन्दिरम् |
| द्वितीयम् | सुश्रीयोगिता | पतञ्जलिगुरुकुलम् |
| तृतीयम् | श्रीअभिनवः | सरस्वतीविद्यामन्दिरम् |
| चतुर्थम् | सुश्रीविदुषीआर्या | पतञ्जलिगुरुकुलम् |

**हिन्दीभाषासामान्यज्ञानम्**

| | | |
|---|---|---|
| प्रथमम् | श्रीसन्दीपकोठारी | श्रीरघुनाथकीर्तिपरिसरः |
| द्वितीयम् | सुश्रीप्रियंकाजगुरी | श्रीरघुनाथकीर्तिपरिसरः |
| तृतीयम् | श्रीप्रवीणचमोली | श्रीरघुनाथकीर्तिपरिसरः |
| चतुर्थम् | श्रीमनीषनौरियालः | श्रीरघुनाथकीर्तिपरिसरः |

**भाषणम्**

| | | |
|---|---|---|
| प्रथमम् | श्रीमोहितशर्मा | श्रीरघुनाथकीर्तिपरिसरः |
| द्वितीयम् | सुश्रीमोनिकानौगैनः | सरस्वतीविद्यामन्दिरम् |
| तृतीयम् | श्रीपीयूषतीवारी | श्रीरघुनाथकीर्तिपरिसरः |
| चतुर्थम् | श्रीआयुषउनियालः | श्रीरघुनाथकीर्तिपरिसरः |

**एकलगानम्**

| | | |
|---|---|---|
| प्रथमम् | धनञ्जयदेवराडी | श्रीरघुनाथकीर्तिपरिसरः |
| द्वितीयम् | सुश्रीमोनिकानौगैनः | सरस्वतीविद्यामन्दिरम् |
| तृतीयम् | श्रीशोभितनौरियालः | श्रीरघुनाथकीर्तिपरिसरः |
| चतुर्थम् | ध्रुवजोशी | श्रीरघुनाथकीर्तिपरिसरः |

एवं प्रकारेण राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरे हिन्दीपक्षोत्सवस्यायोजनं महतोल्लासेन जातम्।




पुरस्कारं स्वीकुर्वती प्रतिभागी

## श्रीरघुनाथकीर्तिपरिसरे समायोजिता राज्यस्तरीयस्पर्धाः

परिसरेण अक्टूबरमासस्य 17 दिनाङ्कात् 18 दिनाङ्कं यावद् राज्यस्तरीयस्पर्धाः समायोजिताः। उद्घाटनावसरे मुख्यातिथित्वेन श्रीविनोदकण्डारीमहोदयाः (विधायकाः देवप्रयागस्य), विशिष्टातिथित्वेन डा.भोलाझामहोदयाः तथा अध्यक्षत्वेन च परिसरस्य प्राचार्याः प्रो. के.बी. सुब्बारायुडुमहोदया उपस्थिता आसन्। लौकिकवैदिकमङ्गलाचरणाभ्यां कार्यक्रमस्यारम्भोऽभवत्। डा. कृपाशङ्करस्य स्वागतभाषणानन्तरं प्राचार्यैः मुख्यातिथीनां विशिष्टातिथीनां च पुष्पगुच्छप्रदानेन राङ्कवप्रदानेन च स्वागतं विहितम्। वाचिकं स्वागतं प्रो.बनमालीबिश्वालमहोदयेन कृतम्। अस्य कार्यक्रमस्य सञ्चालनं डा. शैलेन्द्रप्रसादउनियालमहोदयः कृतवान्। अष्टादशे दिनाङ्के सम्पूर्तिकार्यक्रमः आयोजितः यत्र मुख्यातिथिरूपेण श्रीप्रतापसिंहः (क्षेत्रीयसंगठनमन्त्री, संस्कृतभारती, उत्तराखण्डः) विशिष्टातिथिरूपेण डा. कञ्चनतिवारी, डा. मञ्जुनाथः, डा.रतनलालशर्मा चोपस्थिता आसन्। तत्र च स्वागतभाषणं डा.आर.बाल.मुरगनमहोदयेन, प्रतिवेदनप्रस्तुतिकरणं डा. कृपाशङ्करशर्मणा, अध्यक्षीयोद्बोधनं प्राचार्येण, धन्यवादज्ञापनं डा. सुरेशशर्मणा, पुरस्कारोद्घोषणं डा.दिनेशपाण्डेयेन तथा कार्यक्रमसञ्चालनञ्च डॉ.श्रीओमशर्मणा कृतम्।



कण्ठपाठं प्रस्तुवन् कनिष्ठः प्रतिभागी



कण्ठपाठ-स्पर्धायां निर्णायकाः

अस्मिन् कार्यक्रमे विभिन्नाः स्पर्धाः डा. कृपाशङ्करशर्ममहोदयानां संयोजकत्वे परिसरेणानेन समायोजिताः। यासां परिणामः एवमस्ति- काव्यकण्ठपाठे प्रथमः तेजवीरआर्यः, द्वितीया सिमरनकुमारी, तृतीयः दीपककुमारः। अष्टाध्यायीकण्ठपाठे प्रथमः जयप्रकाशः, द्वितीयः विश्वामित्रः, तृतीया अङ्किता। अमरकोषकण्ठपाठे प्रथमः जयप्रकाशः, द्वितीयः पीयूषतिवारी। व्याकरणशलाकायां प्रथमः श्यामदेवः। गीताश्लोककण्ठपाठे प्रथमः वेदभानुः, द्वितीयः अन्तिमः, तृतीया दीक्षा। धातुरूपकण्ठपाठे प्रथमः आकाशः, द्वितीयः पङ्कजकुमारजोशी, तृतीयः सुनीलदत्तः। व्याकरणभाषणे प्रथमः पुनीतकुमारः, द्वितीयः मोहितउनियालः। सांख्ययोगभाषणे प्रथमः राजेशकुमारः। वेदभाष्यभाषणे प्रथमौ आकाशभट्टभारतकुमारौ, द्वितीयः देवेन्द्रकुमारः, तृतीयः आकाशउनियालः। धर्मशास्त्रभाषणे प्रथमः ईश्वरः। समस्यापूर्तौ प्रथमः आकाशः, द्वितीयः भारतकुमारः, तृतीयः देवेन्द्रआर्यः। साहित्यशलाकायां प्रथमः कैलाशः, द्वितीयः देवेशपन्तः, तृतीयः अभिषेकसती। स्फूर्तिस्पधायां प्रथमः कालिदासगणः, द्वितीयः पाणिनिगणः, तृतीयः दण्डीगणः। अन्त्याक्षर्यां प्रथमः अजयआर्यः तथा द्वितीयः ऋतेशश्च। एवं प्रकारेण श्रीरघुनाथकीर्तिपरिसरे राज्यस्तरीयाः स्पर्धाः समायोजिताः।



राज्यस्तरीयस्पर्धासु पुरस्कारं स्वीकुर्वती प्रतिभागिनी




स्वच्छतापक्षे अभिनन्दितम् अतिथिद्वयम्

**स्वच्छभारताभियाने श्रीरघुनाथकीर्तिपरिसरः** - श्रीरघुनाथकीर्तिपरिसरे अक्टूबरमासस्य 21 दिनाङ्के स्वच्छभारताभियानमाश्रित्य परिसरस्य प्राचार्यसमेताः सर्वे अध्यापकाः, छात्राश्च परिसरस्य पार्श्वे स्थितानां स्थलानां परिष्करणं कृत्वा स्वच्छताकार्यक्रममकुर्वन्। परिसरस्य प्राचार्येण सामान्यजनाः स्वच्छताविषये उद्बोधिताः। सम्पूर्णनगरे स्वच्छतां प्रति सजगताविषये देवप्रयागे एका प्रदर्शनी अपि आयोजिता यत्र च समस्तपरिसरीयाः कर्मचारिणः, छात्राः, प्राध्यापकाः नगरवासिनश्चोपस्थिताः आसन्। एवं स्वच्छभारताभियानस्यायोजनं राष्ट्रियसंस्कृतसंस्थानस्य श्रीरघुनाथकीर्तिपरिसरेण श्रमपूर्वकं निष्ठया च विहितम्।

**जनपदस्तरीयाः स्पर्धाः-** उत्तराखण्डराज्ये संस्कृतं द्वितीयभाषारूपेणाङ्गीकृताऽस्ति। अतः न केवलं राज्यस्तरे संस्कृतस्य प्रचारो भवति अपितु सर्वेषु क्षेत्रेषु संस्कृतसम्बद्धाः कार्यक्रमा आयोज्यन्ते। जनपदस्तरेऽपि विभिन्नाः कार्यक्रमाः भवन्ति। अस्मिन् वर्षे उत्तराखण्डसंस्कृत-अकादमी(उत्तराखण्डसर्वकार) द्वारा आयोजितानां जनपदस्तरीयसंस्कृतच्छात्रस्पर्धानामायोजनम् अक्टूबरमासस्य २३ दिनाङ्के श्रीज्वालापाधामसंस्कृतविद्यालये अभवत्। तत्र श्रीरघुनाथकीर्तिपरिसरस्य प्राचार्यमहोदयानामाध्यक्ष्ये डा.वीरेन्द्रसिंहबर्त्वाल-डा. दिनेशचन्द्रपाण्डेय- डा.अवधेशबिजल्वाण- श्रीपङ्कजकोटनालमहोदयानां निर्देशने च मोहित-दिगम्बर-शुभम्-साक्षी-निकिता-हिमांशु-भाष्कर-वर्षाः परिसरीयाश्छात्राः नाटक-वादविवाद-समूहगान-आशुभाषण- समूहनृत्य-श्लोकोच्चारणसंस्कृतस्पर्धासु भागं गृहीतवन्तः पुरस्कारांश्च प्राप्तवन्तः।








**परिसरे गणेशोत्सवस्यायोजनम्-** रघुनाथकीर्तिपरिसरे सितम्बरमासस्य द्वितीये दिनाङ्के सोमवासरे गणेशोत्सवस्यायोजनमभवत्। अस्मिनवसरे परिसरस्य प्राचार्येण प्रो.के.बी. सुब्बारायुडुमहोदयेन भगवतो गणनाथस्य समर्चना विहिता यस्याञ्चोपस्थिता आसन् सर्वेषां विभागानां प्राध्यापकाः। वेदविभागाध्यक्षेण डा. शैलेन्द्रप्रसादउनियालमहोदयेन तद्विविभागीयैः छात्रैश्च वैदिकविधिना सम्पूर्णं पूजाकर्म सम्पादितम्। पूजावसानसमये गणेशपूजामश्रित्य काव्यपाठोऽपि सञ्जातः। अन्ते च प्रसादवितरणेन कार्यक्रमस्य सम्पूर्तिरभवत्। एवमाचरितः श्रीरघुनाथकीर्तिपरिसरेण गणेशपूजनोत्सवः।



## अगरतलायां सम्पन्ने सप्तदशनाट्यमहोत्सवे भागग्रहणम्



नाट्यप्रतिभागिनां मार्गदर्शकैः सह छायाचित्रम्

राष्ट्रियसंस्कृतसंस्थानं सर्वेषां परिसराणां साहित्यिककौशलाभिवृद्धिसिद्धये प्रतिवर्षं नाट्यमहोत्सवस्योजनं करोति यत्र च समागच्छन्ति सर्वेभ्यः परिसरेभ्यः छात्राः नाट्यकौशलं प्रदर्शयितुम्। अस्मिन् वर्षेऽपि अगरतलायां स्थिते एकलव्यपरिसरे सप्तदशनाट्यमहोत्सवस्योजनं राष्ट्रियसंस्कृतसंस्थानेन नवम्बरमासस्य 30 दिनाङ्कात् दिसम्बरमासस्य 02 दिनाङ्कं यावद् विहितम् यत्र द्वादशनाटकानां मञ्चनं संस्कृतसंस्थानस्य विभिन्नैः परिसरैः कृतम्। अस्मिन् महोत्सवे श्रीश्रीओमशर्मणः, डा. अरविन्दगौरस्य च मार्गदर्शने श्रीरघुनाथकीर्तिपरिसरेण वी.राघवन्कृतस्य अनारकलीनाटकस्याद्भुतं प्रदर्शनं कृतं तथा विभिन्नाः पुरस्काराश्च लब्धाः। नाटकस्य निर्देशनं डॉ.कृपाशङ्करशर्मणा कृतमासीत्। ।



अनारकलीनाटकमञ्चनान्तरम् अभिनेतारः

**दिसम्बरमासस्य सत्रार्धपरीक्षा कठोरानुशासनेन सम्पन्ना–** राष्ट्रियसंस्कृतसंस्थानस्य सर्वेषु परिसरेषु एकस्मिन् वर्षे वारद्वयं छात्राणां सत्रार्ध–परीक्षाणाम् आयोजनं क्रियते। सत्रस्यैकस्य प्रथमा परीक्षा दिसम्बरमासे द्वितीया च मईमासे आयोज्यते। 2019–2020 सत्रस्य परीक्षाया आयोजनं दिसम्वरमासस्य त्रयोदशदिनाङ्कात् त्रिंशद्दिनाङ्कपर्यन्तमभवत् यत्र च सर्वैः छात्रैः स्वविषयसम्बद्धा परीक्षा धैर्येण गाम्भीर्येण च प्रदत्ता। केन्द्रनिर्देशकस्य प्राचार्यमहोदयस्य मध्ये मध्ये निरीक्षणमपि जातम्। अध्यापकैरपि स्वनिरीक्षणकार्यं सावधानतया कृतम्। परीक्षायां निरीक्षणर्थं राष्ट्रियसंस्कृतसंस्थानात् अपि निरीक्षका समागता आसन्। एवं परिसरे दिसम्बरमासस्य सत्रार्धपरीक्षा कठोरानुशासनेन सम्पन्ना जाता।

**समायोक्ष्यन्ते विविधशास्त्रीयाः राष्ट्रियसङ्गोष्ठ्यः–** राष्ट्रियसंस्कृतसंस्थानस्यायं सङ्कल्पो विद्यते यत्केनापि प्रकारेण स्यात् परन्तु छात्राणां ज्ञानाभिवृद्धिः स्यात्। तदर्थं चायोज्यन्ते परिसरेषुविविधशात्राणां राष्ट्रियसङ्गोष्ठ्यः। श्रीरघुनाथकीर्तिपरिसरे फरवरीमासस्य 24 दिनाङ्कात् मार्चमासस्य 05 दिनाङ्कपर्यन्तं विविधविभागाणां शोधात्मिक्यः शात्राणां राष्ट्रियसङ्गोष्ठ्यः समायोजिता भविष्यन्ति, यत्र च भारतस्य नैकेभ्यो भागेभ्यो विद्वांसः आगत्य स्वज्ञानस्य प्रदर्शनं विधास्यन्ति। अन्ताराष्ट्रिय–राष्ट्रीय–सङ्गोष्ठीविवरणम् इत्थं वर्तते–

| दिनाङ्कः | विभागः | विषयः | संयोजकाः |
|---|---|---|---|
| 24–25 फरवरी 2020 | सर्वदर्शनसङ्गोष्ठी | अद्यतनसन्दर्भे दर्शनशास्त्राणां प्रासङ्गिकता | प्रो.बनमालीबिश्वालः |
| 26–27 फरवरी 2020 | वेदान्तविभागः | अद्वैतवेदान्ते दर्शनान्तराणां योगदानम् | प्रो. के.बी.सुब्बरायुडुः |
| 27–28 फरवरी 2020 | व्याकरणविभागः | संस्कृतव्याकरणपरम्परायामाधुनिकविदुषां योगदानम् | प्रो.बनमालीबिश्वालः |
| 29 फरवरी–01 मार्च 2020 | साहित्यविभागः | संस्कृतसाहित्ये नूतनप्रवृत्तयः | डॉ.कृपाशङ्करशर्मा<br>डॉ.अनिलकुमारः |
| 01–02 मार्च 2020 | वेदविभागः | वैदिकवाङ्मये विष्णुतत्त्वम् | डॉ. शैलेन्द्रप्रसादउनियालः |
| 03–04 मार्च 2020 | ज्योतिषविभागः | भैषज्यज्योतिषविमर्शः | डॉ.सुरेशशर्मा |
| 04–05 मार्च 2020 | आधुनिकविभागः | साहित्य और इतिहास में राष्ट्रवाद | डॉ.अरविन्दगौरः |

## संस्कृतगौरव-शतकम्

प्रो. बनमाली बिश्वालः

### मङ्गलाचरणम्

वन्दे सुरभाषां रम्यां हृद्यां सुललितां गिरम्।
वन्दे विश्वमनोज्ञान्तां वन्दे संस्कृतमातरम्।1।
विदुषः पाठकान् श्रोतृन् प्रणम्यादौ यथोचितम्।
संस्कृत-गौरवं श्लोकैः पुरस्कर्तुं समुत्सहे।2।

### नान्दी-वाक्

परिसरे च नूत्नेऽस्मिन् शुभे देवप्रयागके।
साप्ताहिकः पाल्यतेऽसौ संस्कृतस्य महोत्सवः ।3।
सेत्स्यति सफलश्चायं समाहरोह-विशेषकः ।
संस्कृतस्य च लोकेऽस्मिन् प्रभावं ख्यापयंश्चिरम्।4।
संस्कृत्याङ्गगतान् पुष्टान् सिद्धान्तान् युक्तिसङ्गतान्।
विद्वांसः स्थापयिष्यन्ति संस्कृत-हितसाधकान् ।5।
संस्कृत-वाङ्मयस्याहो सुमहत्यः परम्पराः।
तासां परम्पराणाञ्च प्रभावः संस्कृतौ महान्। 6।
तथ्यं सर्वं परिशील्य छात्रैश्चाध्यापकास्समे।
संस्कृते ख्यापयिष्यन्ति विचारान् स्वकीयान् नवान्।7।

### संस्कृतस्य संज्ञा स्वरूपञ्च

भेदैस्सुसंस्कृता भाषा प्रकृति-प्रत्ययादिभिः।
अन्वर्थनाम लोकेऽस्याः संस्कृतं वै प्रसिद्ध्यति।8।
संस्करोत्यत्र भावांश्च शुद्धिं प्रापयति पुनः।
प्रसिद्ध्यति स्वरूपञ्च वाक्य-विश्लेषणात्मकम्।9।
तत्त्वसमीक्षणेनापि संस्कृतेयं मता क्वचित्।
संस्कार-संस्कृतिभ्यान्तु स्थितिरस्या विशिष्यते।10।

### संस्कृतस्य सुरभाषात्वम्

दैवी वागभिधा चेयं सुरभाषा सुसंस्कृता।
श्रेष्ठत्वं संस्कृतस्यास्य नामभिर्द्योत्यते स्वकैः।11।
भाषा प्राकृतिकी चेयं न मृता न मरिष्यति।
मृतान्सञ्जीवयत्येषा सञ्जीवनी परा क्वचित्।12।

### संस्कृतस्य जनभाषात्वम्

प्रयोजनद्वयञ्चात्र भाषायास्स्वीकृतं पुनः।
प्रयोजनयुगं तच्च संस्कृते घटते स्वतः।13।
लोकोपयोगसाध्यञ्च ह्युद्देश्यं प्रथमं मतम्।
सम्प्रेषणाभिधं तस्य द्वितीयं वै प्रयोजनम् ।14।
जीवन्ती जनभाषेयं शास्त्र-साहित्य-पोषिका।
मानुषी संस्कृता चेयं शिष्टभाषा क्वचित् पुनः।15।
संस्कृतस्य प्रयोगस्तु प्राचीन-वाङ्मयेऽभवत्।
एतन्नाम्नः प्रयोगोऽपि साक्षाद्रामायणादिषु ।16।
संस्कृतमण्डितञ्चासीन्मण्डनस्य गृहं पुनः।
शास्त्रार्थे सम्प्रवृत्ताश्च संस्कृतेन कीराङ्गनाः।17।
कवयामि वयामीह यामीति भाषणे पटुः।
प्रसिद्धस्तन्तुवायोऽपि भोजकाले कविर्मतः।18।
प्रत्यावासं गृहिण्योऽपि संस्कृतभाषणे रताः।
आसन्निति मतञ्चेदं विल्हणस्य प्रसिद्ध्यति।19।
न च क्लिष्टा भाषाऽप्यस्ति न तथा सरला पुनः।
ये यथा तां प्रपद्यन्ते भजति तांस्तथैव सा।20।

### संस्कृतस्य राष्ट्रभाषात्वम्

प्रान्तीया भवितुं नार्हाः राष्ट्रभाषा कदाचन।
संस्कृतं राष्ट्रभाषात्वं प्राप्नुयाद् भारतेऽचिरम्। 21।
भाषागत-समस्यानां समाधान-समुत्सुकाः।
विना कालविलम्बेन दिशि चास्यां प्रवर्तेरन्। 22।
संस्कृतायोचितं स्थानं दीयते भारते यदि।
समग्रं विश्वमस्माकं सम्मानं कर्तुमुत्सहेत्। 23।
अपूर्णं भारतं नूनं संस्कृतेन विना भवेत्।
भवन्तु यत्नशीलाश्च भारते बुद्धिजीविनः। 24।
भाषैव संस्कृतं नास्ति निवसत्यत्र भारतम्।
भूत-भविष्ययोश्चेदं सेतूभूतं विराजते। 25।

### संस्कृतस्य व्याकरणनिष्ठत्वम्

अष्टाध्याय्यां स्वसूत्रेषु पाणिनिना महर्षिणा।
भाषाशब्दः प्रयुक्तोऽस्ति संस्कृतस्य कृतेऽसकृत्। 26।
प्रयोगशरणञ्चात्र व्याकरणं निगद्यते।
भाषा-व्याकरणे चात्र परस्परस्य पूरके। 27।
लोकेऽत्र सर्वभाषाणां संस्कृतं जननी मता ।
पाणिनेः शब्दशास्त्रन्तु सर्वभाषोपकारकम्। 28।

### संस्कृतस्य आधुनिकत्वम्

प्राचीनेयं यथा ख्याता ह्यर्वाचीना तथा मता।
अत एव प्रसिद्धोक्तिर्युवतीयं पुराण्यपि।29।
भाषाणां भारतीयानां शब्दाः ये सन्ति साधवः।
ते सर्वे संस्कृताः शब्दाः मनागपि न संशयः।30।
एकतो वैदिकी यत्रान्यतस्सङ्गणकी पुनः।
प्राकृतिकी भाषाऽद्यत्वे सिद्ध्यति गणकस्य सा।31।
साहित्यं रच्यते यस्यां नित्यमभिनवं पुनः।
सम्भवति कुतस्तत्र गतयामत्वकल्पना।32।
पाणिनिर्मन्यतेऽद्यत्वे प्रौद्योगिक्यादिमानवः।
स चादिपुरुषः ख्यातः सूचनातन्त्रजालके।33।
सम्पाद्यन्ते प्रकाश्यन्ते पत्रिकाः नवीनाः पुनः।
सर्वत्र नवतन्त्रेषु संस्कृतस्य स्थितिर्दृढा।34।
प्रगतौ च समाजस्य सम्बद्धा पत्रकारिता।
पुरातनी प्रसिद्धाऽस्ति संस्कृतपत्रकारिता।35।
नानाविषयसम्बद्धाः नानारुचिपरायणाः।
पत्रिका विविधाः सन्ति संस्कृते च प्रकाशिताः।36।
संस्कृतपत्रिकाः याश्च भवन्त्यद्य प्रकाशिताः ।
सन्ति शोधात्मिकाः काश्चिदन्याश्च सर्जनात्मिकाः।37।
वार्षिकी मासिकी चात्र साप्ताहिकी च पाक्षिकी।
त्रैमासिकी प्रसिद्धा च षाण्मासिकी च दैनिकी।38।

### संस्कृतस्य सामाजिकः प्रभावः

सामाजिक-प्रभावस्तु समाजेऽस्ति पदे पदे।
वैषम्यञ्च समाजस्य सामाजिकैर्विनिर्मितम्। 39।
सामाजिक-स्वरूपन्तु प्रसङ्गतो विभिद्यते।
अतस्तेषां प्रभावोऽपि बहुधा परिकल्पितः। 40।
भाषागत-प्रभावोऽस्ति प्रभावेषु समादृतः।
भाषामुखेन साहित्य-प्रभावोऽपि भवेद् ध्रुवम्। 41।

संस्कृतं नापवादोऽस्ति प्रसङ्गेऽस्मिन्विशेषतः।
शास्त्रस्यापि प्रभावोऽत्र साहित्येन समं पुनः॥42।

भाषान्तर-प्रभावेषु विशिष्टस्संस्कृतस्य वै।
भाषा-साहित्य-शास्त्राणां प्रभावोऽत्र विशिष्यते॥43।

संस्कृतस्य विराजन्ते बहुमुख्यः परम्पराः।
याभिः परम्पराभिश्च संस्कृतिर्नः प्रभाविताः ॥44।

बहुविधाः प्रभावाश्च सन्त्यत्र परिकल्पिताः।
भाषा-शास्त्र-प्रभावाश्च क्वचित् साहित्यिकाः पुनः। 45।

संस्कृतज्ञास्ममे विश्वे पताकां संस्कृतस्य वै ।
प्रसारयितुमद्यत्वे बद्धपरिकराश्च ते। 46।

## संस्कृतं समाजौषधम्

नैवम्भूतस्समाजोऽत्र संस्कृतेन न शिक्षितः।
साहित्येनाथ शास्त्रेण क्वचिद्वा भाषया पुनः। 47।

संस्कृतं हि समाजस्य चौषधं परमं मतम्
स्वास्थ्यमस्य समाजस्य संस्कृतेन नवीकृतम्। 48।

प्रभावितः समाजोऽत्र साहित्यैर्विविधैश्च वै।
प्राचीनाधुनिकैः काव्यैः दृश्य-श्रव्यादिभिः पुनः। 49।

शास्त्राणाञ्च प्रभावोऽत्र समेषां दृश्यते क्वचित्।
वेद-वेदाङ्ग-सांख्यादि-दर्शनानां विशेषतः॥50।

पुराण-धर्मशास्त्रैश्च समाजस्सुप्रभावितः।
विना चोपनिषद्विद्यां भारतं भारतं नहि। 51।

## संस्कृतं भारतीया संस्कृतिश्च

भाषैव संस्कृतं नास्ति संस्कृतेः परिपोषकम्।
वैदिकी भारतीयाऽस्तु संस्कृतिर्वा सनातनी। 52।

संस्कृते भारतस्यात्मा चानुस्यूतः पदे पदे।
भारतीय-संस्कृतेश्च रक्षणं संस्कृतेन वै। 53।

भारतस्य प्रतिष्ठायां भूमिका महती यतः।
भारतीय-समाजोऽस्मात् कथं दूरे भवेत् पुनः। 54।

## विविध-धर्मेषु संस्कृतस्य प्रभावः

तत्त्वञ्च हिन्दुधर्मस्य संस्कृतपरिनिष्ठितम्।
अपूर्णा कल्पना तस्य संस्कृतेन विना यतः। 55।

यच्च सन्दृश्यते तत्त्वं धर्मयोः बौद्धजैनयोः।
तद्धि सङ्केतितं सर्वं संस्कृत-वाङ्मये पुनः॥56।

खीस्तधर्मे प्रभावोऽपि संस्कृतस्य महान्मतः।
साक्षात् खीस्तोपदेशस्तु वेदविद्याप्रभावितः॥57।

वाणीष्वपि कुराणस्य वेदगन्धोऽनुभूयते।
कुराणो वा पुराणो वा वेदाश्रितो नु मन्यते॥58।

## संस्कृतस्य सर्वधर्मसमन्वयता

साम्प्रदायिकता नास्ति नास्ति वर्गभेदः पुनः।
जाति-धर्म-प्रदेशेभ्यः परे तिष्ठति संस्कृतम् 59।

संस्कृते शक्यते द्रष्टुं सर्वधर्मसमन्वयः।
भारते तादृशो वादः संस्कृतेन प्रतिष्ठितः॥60।

## महापुरुषाः संस्कृतञ्च

भारतेऽस्तु विदेशे वा महान्तः पुरुषाश्च ये।
अनेकेषां प्रसिद्धिस्तु संस्कृतस्य प्रभावतः॥61।

वेदोपनिषदां सारश्चानुस्यूतः पदे पदे।
वचोविन्यास-वैचित्र्यं तेषामत्र न संशयः। 62।

विवेकानन्दवाणीषु गान्ध्यरविन्दयोः पुनः।
विनोवादेः-कवीराणां वाक्षु तत्त्वञ्च वैदिकम्। 63।

## संस्कृते भारतीय-विद्या-वैभवम्

या विद्या संस्कृते नास्ति सा नास्ति भारते क्वचित्।
संस्कृतं भारतञ्चैकं यः पश्यति सः पश्यति। 64।

भारतस्य हितं यद्यत् सर्वथाऽस्ति सुनिश्चितम्।
संस्कृते निहितन्तत्तत् सर्वदाऽस्ति परीक्षितम्। 65।

भारतीय-दर्शनस्य भाषैव संस्कृतं महत् ।
ज्ञान-विज्ञानयोर्भाषा भाषेयं साहित्यस्य वै॥66।

विद्यावैभवमत्रत्यं भारतीयञ्च प्रायशः।
शास्त्र-साहित्य-रूपेण संस्कृतेऽस्ति सुरक्षितम्। 67।

शासनात्शास्त्रमित्याहुः भाषा च भाषणात् पुनः।
शास्त्ररूपेण विख्यातं भाषारूपेण संस्कृतम्। 68।

शास्त्रस्य विविधाः पक्षाः संस्कृतेऽत्र समाहिताः।
क्वचित्प्रकाशितास्ते च क्वचित्ते चाप्रकाशिताः। 69।

मातृकाः हस्तलेखाश्च संस्कृते सन्ति कोटिशः।
संस्कृतिर्भारतीया च समृद्धा ताभिरेव च॥70।

अप्रकाशितविद्यास्तु प्रकाशनप्रतीक्षया।
आह्वयन्ति समानत्र संस्कृतमातृसेवकान्। 71।

पुरातत्त्व-शिलालेखाः संस्कृतेन समङ्किताः।
भारतगौरवन्ते तु सर्वत्र प्रथयन्ति नु॥72।

पारम्परिकविद्यानामुपविद्याः भवन्ति याः।
दृष्टाः प्रोक्ताः समाश्च ताः संस्कृते चर्षिभिः पुनः। 73।

भारतीयाः समाः विद्याः पूर्वर्षिभिर्विचिन्तिताः।
अक्षुण्णास्तास्तथैवासन् संस्कृतेन सुरक्षिताः॥74।

शास्त्रपरम्परा चात्र संस्कृतेऽस्ति सुरक्षिता।
प्राच्यार्वाचीनयोश्चात्र सेतुभूतञ्च संस्कृतम्। 75।

वेदवेदाङ्गविद्यास्ताः धर्मदर्शनसङ्गताः।
अमरत्वं भजन्त्येते संस्कृतस्य प्रभावतः। 76।

धर्मार्थकाममोक्षाश्च पुरुषार्थाः भवन्ति ते।
एकैकमधिकृत्यात्र शास्त्रमेकं विनिश्चितम्। 77।

संस्कृते भारतीयञ्च धर्मशास्त्रं प्रतिष्ठितम्।
दायभागो दायादाश्च भवन्त्येतेन निर्णीताः। 78।

भारतीयमर्थशास्त्रं कौटिल्येन प्रवर्तितम् ।
वात्सायनेन प्रोक्तञ्च कामशास्त्रं प्रसिद्ध्यति। 79।

दर्शनैर्मोक्षशास्त्रञ्च सर्वथा प्रतिपादितम्।
आस्तिकं दर्शनञ्चात्र षड्धा विभाजितञ्च तत्। 80।

अद्य योगगुरूणाञ्च प्रभावो दृश्यते च यः।
मूले तस्य सर्वथा वै योगः पातञ्जलः स्मृतः। 81।

समाजे रामदेवस्य प्रभावो दृश्यते महान्।
तस्य प्रभावमूलेऽपि योगः पातञ्जलः स्मृतः। 82।

महनीय-प्रभावोऽत्र योगायुर्वेदयोः पुनः।
शरीरन्तु भवेदाद्यं ततश्च धर्मसाधनम्। 83।

आयुर्विद्या प्रदत्ताऽस्ति विश्वाय संस्कृतेन वै।
प्राचीनैव न सा विद्या वैज्ञानिक्यपि सर्वथा। 84।

अत्याधुनिकविद्यासु संस्कृतेऽपि सुरक्षिताः।
भूगर्भशास्त्रमत्रास्ति शास्त्रं वैमानिकं पुनः।85।

रसायनञ्च यच्छास्त्रमाधुनिकं तु सर्वथा।
संस्कृते चास्ति विज्ञानमाधुनिकञ्च भौतिकम्। 86।

आविष्काराश्च यावन्तः आयुर्विज्ञानसम्मताः।
एवं शल्यचिकित्साऽपि सुश्रुतेन पुरस्कृता। 87।

गाणितिकी च सा विद्या संस्कृतेन प्रवर्तिता।
गणितस्य विधास्सर्वास्संस्कृतेऽस्ति सुचिन्तिताः।88।

ज्यामित्या ज्योतिषञ्चात्र परिमितिश्च सांख्यिकी।
रेखागणितमप्यत्र संस्कृतेन पुरस्कृतम्। 89।

मूलभूता दशसंख्याः संस्कृतसम्मताः पुनः।
विश्वाय शून्यमप्यत्र संस्कृतेन समर्पितम्। 90।

प्राप्यते संस्कृते चात्र द्यूतक्रीडादिवर्णनम्।
अक्षश्च चतुरङ्गञ्च संस्कृते वर्णितं क्वचित्। 91।

सङ्गीते संस्कृतेनापि योगदानं कृतं महत्।
तेन सप्तस्वराः दत्ताः विश्वाय शास्त्रसम्मताः। 92।

भाषावैज्ञानिके शास्त्रे संस्कृतस्य स्थितिर्दृढा।
मूलं यूरोप-भाषाणां संस्कृतं मन्यते पुनः। 93।

महाकाव्यानि काव्यानि संस्कृते नाटकानि च।
श्रेष्ठानि चाभिमन्यन्ते भाषान्तरप्रसङ्गतः। 94।

शाकुन्तल-महत्त्वञ्च मतं वैदेशिकैः पुनः।
नाट्यशास्त्रं भरतस्य संस्कृतस्यास्ति गौरवम्। 95।

ईशब्नीतिकथाः दत्ताः विश्वाय संस्कृतेन वै।
ईशबेन कथास्ताश्च स्वीकृताः संस्कृतात्पुनः। 96।

प्राचीना याः कथाश्चात्र संस्कृते वर्णिताः पुनः।
ताभ्यः प्रतिगृहीताऽस्ति आरव-रजनी च सा। 97।

विद्यास्वेवं समास्वत्र प्रामुख्यं संस्कृतस्य वै।
भारतीयैस्समञ्चात्र वैदेशिकैश्च सम्मतम्। 98।

ख्रीस्तपूर्व-शताब्देषु यदत्र सस्कृते स्थितम्।
तत्सर्वमन्यभाषासु कालान्तरे समागतम्। 99।

विद्-ज्ञाने भवेद्वेदः विद्-सत्तार्थके पुनः।
वेदोच्छिष्टं जगच्छर्वमिति तथ्यं सुसङ्गतम्। 100।

### विश्वे संस्कृतशिक्षणस्य विविधायामाः

विद्यालयात् समारभ्य विश्वविद्यालयं यावत्।
महाविद्यालयेष्वेवं संस्कृतं पाठ्यते मुदा। 101।

पारम्परिक-सामान्य-विश्वविद्यालयेषु च।
विविधासु च संस्थासु धर्मसङ्गठनेषु वै। 102।

मठेष्वेव बहुष्वत्र मन्दिरेष्वाश्रमेषु च।
संस्कृतस्य शिक्षणं तु सर्वथा परिपोषितम्। 103।

कुत्रचिदौपचारिकमनौपचारिकं क्वचित्।
सस्कृतशिक्षणं विश्वे शिक्षणेषु महीयते। 104।

न चात्र भारते किन्तु विदेशेषु च केषुचित्।
देशकालस्तरादूर्ध्वं संस्कृतं पठ्यते भुवि। 105।

### शुभाशंसाः आभारश्च

सप्ताहस्संस्कृतस्यायं सिद्ध्यतां सफलस्स्वयम्।
एवं संवर्धतां लोके प्रभावः संस्कृतस्य वै। 106।

अवसराश्च दृश्यन्ते विचारार्थं पदे पदे।
महत्त्वाधायकं कार्यं तेषां प्रकाशनं पुनः। 107।

प्राध्यापकैर्विभागानामध्यक्ष-प्रमुखैश्च मे।
काव्यं समर्थितं प्रायः प्राचार्यैस्संस्कृतप्रियैः। 108।

दत्तश्चावसरो मह्यमुदारपूर्वकञ्च यैः।
तत्समेभ्यो यथायोग्यं कार्तज्ञ्यं विनिवेद्यते। 109।

काव्यस्यास्य प्रकाशार्थमवसर-प्रदायकाः।
आयोजकाः सभाज्यन्ते साधुवादैर्यथोचितैः। 110।

### भरतवाक्यम्

जयतात् संस्कृता विद्या लोकमङ्गलकारिणी।
जयतात् संस्कृतं शास्त्रं सर्वलोकोपकारकम्। 111।

संस्कृतभाषया लोकः सुसंस्कृतो भवेद्यदि।
सुसंस्कृत-समाजस्य सुसंस्कृता भवेद् गतिः। 112।

जयतात्संस्कृतं लोके जयेयुस्तदुपासकाः।
जयताद्भारतं लोके जयेद् भारत-भारती। 113।

संस्कृतगौरवेणात्र वयन्तु गौरवान्विताः।
तिरष्कारेण तस्यात्र स्वतो वयं तिरस्कृताः। 114।

लोकेन रक्षितं सच्च लोकं रक्षति संस्कृतम्।
रक्ष्यरक्षकभावोऽत्र अन्योन्याश्रयपोषितः।115।



## प्रियं भारतम्         डॉ.दिनेशचन्द्रपाण्डेयः

वेदमन्त्रैर्युतं  पुष्परेणूद्भवं संस्कृतं, संस्कृतिं वर्धयन्तो जनाः।
योगिनां त्यागिनां भूमिरेषा शुभा, पुण्यदं कामदं मे प्रियं भारतम्। 1॥

विन्ध्यहेमाद्रिकूटैः समाच्छादितं, गङ्गया गोदया सिक्तमाकर्षकम्।
ब्रह्मपुत्रादिभिः पावनं निर्मलं , भारतं मे प्रियं भारतं मे प्रियम्। 2॥

यज्ञहोमादिगन्धैर्युतं मन्दिरं, गीतवाद्यं तथा नृत्यमेलापकम्।
यत्र रामायणं गीयते नित्यदं, शोभते भूतले मे प्रियं भारतम् ।।3।।

यत्र वेदामृतं यत्र रामायणं, यत्र गीतोपदेशाश्च मार्गप्रदाः ।
कालिदासस्य काव्यैः स्तुतं वर्धितं, शोभते तत्प्रियं भारतं भूतले ।।4।।

सर्वशिष्या गुरोरादरायार्पिताः, शिक्षकाश्छात्रसम्पाठने संरताः।
आप्यते विद्यया चामृतं यत्र तत् शोभते भूतले मे प्रियं भारतम् ।।5।।

## 1.जगन्नाथस्वामी               डा. अनिलकुमारः

जगन्नाथस्य नित्यं मे मन्दिरं प्रीतिवर्धनम्।
तस्य दिव्यस्वरूपं यद् देवानामपि दुर्लभम्।।1।।

आचरति यथा लोकस्तथैवात्रानुभूयते।
तथाप्यलौकिकं रूपं नित्यं हि प्रतिभाति मे।।2।।

चिन्तयामि कथं पुण्यं लब्धं जन्म मया हि तत्।
दर्शनं जायते यस्मात्तव गुणानुकीर्तनम्।।3।।

सर्वदैव च तद्रूपं भवत्याह्लादकारकम्।
निशायां सर्वभूतानामज्ञानस्य विनाशकम् ।।4।।

गायन्ति विबुधा नित्यं महिमानं तवाद्भुतम्।
नीलाचलनिवासाय नमस्ते मम सर्वदा। ।5।।

समुद्रस्य तटे शोभा दृश्यते निर्मला सदा।
मतिर्मे ध्यानमग्ना स्याज्जगन्नाथस्य पादयोः।।6।।

निर्विकारोऽपि साकारो राजते रूपवान् प्रभुः।
कथं च त्वामहमित्थं चिन्तयाम्यखिलेश्वरम्।।7।।

मायया मोहितास्सर्वे तवैव देहधारिणः।
ब्रह्म सत्यं जगन्मिथ्या किमर्थं न भणन्ति ते।।8।।

गुणिनो गुणतां यान्ति मेधाविनश्च मेधताम्।
यत्कृपया तथाभूतं नमामि जगदीश्वरम्।।9।।

श्रूयते महिमा येषां त्रिदेवानां यथाद्भुतः।
तथैव तानहं स्तौमि श्रेयसे ते भवन्तु नः।।10।।

ज्ञातुमिच्छामि तद्रूपं यत्सर्वेषां शुभङ्करम्।
देवा ध्यायन्ति नित्यं तं प्रसीदतु च सर्वदा।।11।।



## 2.शारदास्तवनपञ्चकम्

विद्यते या सदा श्वेतपद्मालया मालया वीणया शोभते सा तथा।
भाति विद्वन्मुखे भाषते यो यदा पूजनीया च वाणी तदा सुहृदः।।1।।

नैव जानामि कीदृक् स्वरूपं हि ते ज्ञानयुक्ते सदा रक्ष मां बन्धनात्।
वाग्विलासे रतिः स्यादतः शारदे ज्ञानदे ते स्वरूपं च मोक्षप्रदम्।।2।।

सज्जनो नो समाजे मया दृश्यते दुर्जनस्य प्रभावेण ना पीडितः।
भारते भारती भाति नो रक्षिता शिक्षिता ये जनास्ते कथं बोधिताः।।3।।

यत्र देवास्तथा मानवा वै यथा सच्चरित्रेण पूता भवन्ति सदा।
यस्य तत्पावनं भाति गङ्गातटं तस्य नित्यं प्रभो भातु पुण्यं यशः।।4।।

अद्य यत्पूजनं भक्तिपूर्णं मया साधुभावेन ते क्रियते शारदे।
तेन मे भारतं भातु विश्वे गुरू राजतां तस्य कीर्तिर्नभोमण्डले।।5।।

## 3.रघुनाथकीर्तिः

रघुनाथस्य कीर्तिर्या भाति विश्वेऽखिले सदा।
तन्नाम्ना च सुविख्यातं मन्दिरमिदमद्भुतम्।।1।।

तत्पार्श्वे सङ्गमो जातो मनोहरश्च पुण्यदः।
भागीरथ्याः सहैवात्र नित्यश्चालकन्दया।।2।।

संस्कृतस्य प्रचारस्स्याल्लक्ष्यं भातीति यन्महत्।
संस्थानेन तदर्थञ्च परिसरो हि कल्पितः।।3।।

मन्ये रघुकुलश्रेष्ठः प्रतिकणेषु विद्यते।
अचलानां यथा शोभा गङ्गा तथैव शोभते।।4।।

नतोन्नतश्च यो मार्गः शिवकण्ठे भुजङ्गवत्।
सर्वतो भाति सस्यानां सुषमा सुमनोहरा।।5।।

पर्वतो वह्निमान् प्रातरनुमीयते यन्मया।
तदा स्मरामि तच्छास्त्रं गौतमेन विनिर्मितम्।।6।।

समायातो यदा सूर्यो भाति यश्च मणिर्यथा।
खगानां कूजनन्त्र शोभतेऽनुदिनन्तथा।।7।।

नगराणां यथा शोभा प्रतिदेशे विभाति वै।
चन्दनं लेपितं मन्ये शरीरे सुभगे यथा।।8।।

यदाऽस्तमेति भानुर्वै निशाकर उदेति च।
पर्वतो याति मध्यस्थं तदा माघं स्मरामि भोः।।9।।

निशायास्तारकोपेता शोभा या दृश्यते यथा।
विद्युता द्योतते तावन्नगराणां स्थितिस्तथा।।10।।

सङ्गमस्याद्भुते तीरे विद्यते भवनं महत्।
रघुनाथस्य कीर्तिश्च विशाला परिशोभते।।11।।

प्रशासनस्य मर्मज्ञाः प्राचार्या हि तपस्विनः।
सर्वशास्त्रेषु निष्णाता गुरवश्च प्रतिष्ठिताः।।12।।

पाठयन्ति यथा छात्रान् शिक्षका भावपूरिताः।
ध्यानमग्नाश्च दृश्यन्ते शिष्या विशिष्टबुद्धयः।।13।।

वेदानाञ्च यथा घोषस्तथैव भास्करद्युतिः।
काव्यशास्त्रविनोदश्च न्यायशास्त्रस्य चिन्तनम्।।14।।

श्वेतपीताम्बराश्छात्रा ज्ञानपिपासवस्तथा।
रघुनाथस्य पुत्रास्ते भवन्ति मृदुभाषिणः।।15।।

निर्मलं यन्मनस्तेषां ज्ञानेन तच्च पूरितम्।
वसति शारदा कण्ठे नित्यं मनोहरा च सा।।16।।

विविधेषु च शास्त्रेषु गतिस्तेषां हि विद्यते।
तस्मात्सर्वत्र कीर्तिर्भोः! रघुनाथस्य राजते।।17।।

श्रूयन्ते मधुरं गानं भक्तिभावेन पूरितम्।
मन्दिराद्रघुनाथस्य विष्णुनामसहस्रकम्।।18।।

गङ्गायां पावना भूत्वा मन्दिरं यान्ति पूजकाः।
रघुनाथकृपा तेषु विद्यते निर्मला सदा।।19।।

रघुनाथो जगन्नाथः सर्वेषां भक्तवत्सलः।
रमन्ते योगिनो यत्र तत्र भवतु मे मतिः।।20।।

## 1.स्वतन्त्रतादिवस-पञ्चकम्  डा. शैलेन्द्रप्रसादउनियालः

गणानां तन्त्रत्वाद्भवतु गणतन्त्रं सुखयुतम्,
जनानां ज्ञानं वै प्रसरतु शुभायेह नितराम्।
नमामस्तान् सर्वान् बलिकवलितान्नॄन् सुखमुखान्,
जनानां तन्त्रं नो भवतु भुवने भव्यसृतये।।1।।

सुभाषाऽऽशां नो वै जनयतु सदा शासकनृणां
जना जानीयुस्त्वां जगति जयशीलां शुभधराम्।
सुरक्ष्यं लक्ष्यं नो भवतु भवदीयैव भवने
सदा स्वस्था व्यस्ताः प्रकृतिसरलाः सन्तु जनताः।।2।।

संस्कृतिर्विश्ववारा हि भारतीया सुखप्रदा।
दुष्टानां दलने नित्यं प्रेरणां प्रददाति च।।3।।

मानवो मा नवं मार्गं ज्ञातुं वै विवशो भवेत्।
मार्गोऽस्ति श्रुतिबोध्यो हि तत्र का परिदेवना।।4।।

स्वतन्त्रतादिने ह्यद्य गणेशः परिपातु वः।
गणानां सभ्यता भूयाद्भारते भरताद्यथा।।5।।

## 2.संस्कृतभाषापञ्चकम्

सुभाषा वेदानां जनयति शुभाऽऽशां हृदि सताम्,
सदा संस्काराणां भवति हृदयो भूमिसुतले।
यथारण्यं पूर्वं लसति रमणीयं न हि वपुः,
प्रपश्योद्यानं भोः वदतु न मनः कस्य रमते।।1।।

सुते पङ्के लग्ने नहि नहि पिता स्निह्यति मुदा,
यदा मात्रासौ वै विमलधवलैरुत्परिमलैः।
सुसज्जीभूतोऽसौ परिजनमिहाकर्षति पुनः,
सुसंस्काराल्लोके भवति महिमा चापि गरिमा।।2।।

अतः सर्वो लोको भवतु भुवने संस्कृतमयः,
न सप्ताहो मासो ह्यपितु सकलं जीवनमिदम्।
सदा वेदैः शास्त्रैः रचितशुभमार्गैर्लसतु नः,
स्वसामर्थ्याल्लोके मम भवतु सेवायुततनुः।।3।।

यथा बालं स्निग्धं सुपरिमलमुत्संस्कृततनुम्,
पिता धृत्वा क्रोडे विमलमतिषु स्निह्यति सदा।
तथाऽऽत्मानं चेत्त्वं विमलगणवन्तं प्रकुरुषे,
तदा प्राणिन्वाणीं वदतु भुवने संस्कृतमयीम्।।4।।

शिला शिल्पाद्रम्या भवति रमणीयातिसुखदा,
गृहं नारीभिर्वै भवति च सुसज्जीकृतमहो।
शिला-नारी-गेहान्यखिलमिह तत् संस्कृतिफलं
अतो भाषा ज्ञेया प्रगतिपथिका संस्कृतमयी।।5।।

## 1.हेरम्बदेवि!  श्रीसन्दीपकोठारिः

हेरम्बहेमवलये हृदि हासिनी वै
हंसाधिरूढहरिणी हरिवल्लभा सा।।
हारावलीहरिविभा हिमशुक्लरूपा
हंसस्थराजिनि हरे! दुरितं हरेस्त्वम्।।1।।

हस्तस्थजु हिमकान्तिसुशुक्लरूपा
हेमादिरत्नपविता स्फटिका च दिव्या।।
हंसोदकादिहवनीयसुगन्धहव्या
हंसस्थराजिनि हरे! दुरितं हरेस्त्वम्।।2।।

हृद्वासिनि! हरिहरस्य हितं करोषी-
हामुत्र हास्यवदनापहतिं हरन्ती।।
हे हे हरीशहृदयस्थसरोजरूपे!
हंसस्थराजिनि हरे! दुरितं हरेस्त्वम्।।3।।

हे हारकान्तिधवले हरिहस्तसेव्ये!
हर्त्री हि हंसमहिषी दुरितं जनानाम्।।
हस्तेन यच्छति वरं हि हरीशवन्द्ये !
हंसस्थराजिनि हरे! दुरितं हरेस्त्वम्।।4।।

## 2.श्रीचन्द्रबदनीपञ्चकम्

चन्द्रकूटाचले चन्द्रकान्तिप्रदे
चारूनेत्रे चिते चारूवक्त्रे चले।।
चन्दनेनार्चिते चेतने चादिमे
चारूचन्द्रानने त्वां हि चायाम्यहम्।।1।।

शक्तिपीठेषु शान्तिप्रदं शम्प्रदं
शङ्करस्थापितं शैवशक्तिस्थलम्।।
शक्तिरूपेण शाक्तादिभिर्ज्जंसिते
चारूचन्द्रानने त्वां हि चायाम्यहम्।।2।

उत्तराखण्डके पुण्यदिव्यस्थले
टेहरीनामके संस्थले शोभते।।
चन्द्रकान्ताचमत्कारिरूपेण या
चारूचन्द्रानने त्वां हि चायाम्यहम्।।3।।

देवपूज्यप्रयागादितीर्थेषु वै
नातिदूरं ततः राजते भूतले।।
दक्षयज्ञे विनष्टे बभूवाक्षया
चारूचन्द्रानने त्वां हि चायाम्यहम्।।4।।

विष्णुचक्रेण सम्पातितं यन्मुखम्
आदिशक्त्यास्सतीचण्डिकायाश्च वै।।
आननं भूतले पातितं तत् ततः
चारूचन्द्रानने त्वां हि चायाम्यहम्।।5।।



## परिसरीयशैक्षणिकसदस्यानां शैक्षिकोपलब्धयः-

### प्राचार्यदैनन्दिनी

1 02.05.2019 विशेषकार्यार्थं बहिर्गमनम्।

2 11.6.19 आवश्यककार्यार्थं मुख्यालयं प्रति गमनम्।

3 28.06.19 विशेषकार्यार्थं बहिर्गमनम्।

4 18.07.19 कोचीनगरे कार्यशालायाम् उपवेशनम्।

5 19.07.19 द्विदिवसीयायां राष्ट्रियसङ्गोष्ठ्यामुद्बोधयितुं बैङ्गलूरं प्रति गमनम्।

6 27.07.19 हैदराबादनगरे विशिष्टकार्यार्थं गमनम्।

7 10.08.19 जयपुरस्थे परिसरे संस्कृतसप्ताहावसरे मुख्यातिथिपदं निर्व्यूढम्।

8 23.08.19 संस्थानस्य 6तमे दीक्षान्तसमारोहे भागं ग्रहीतुं नवदेहलीम्प्रति गमनम्।

9 27.09.19 आवश्यककार्यार्थं बहिर्गमनम्।

10 14.10.19 आवश्यककार्यार्थं वाराणसीं प्रति गमनम्।

11 24.10.19 आवश्यककार्यार्थं बहिर्गमनम्।

12 09.11.19 अखिलभारतीयविश्वसंस्कृतसम्मेलने नवदेहल्यां भागग्रहणम्।

13 09.11.19 पी.डब्ल्यू.डी. इत्यस्याधिकारिभिः सहोपवेशनम्।

14 04.12.19 23तमे 'वेव'इत्यस्मिन् भारतीयाधिवेशने नवदेहल्याम् उपस्थितिः।

### प्रो. बनमाली बिश्वालः

| | | |
|---|---|---|
| 1 | 16.04.2019 | तमे दिनाङ्के श्रीरघुनाथकीर्तिपरिसरस्य परिसरस्य स्थापनादिवसमुपलक्ष्य समायोजितस्य वार्षिकोत्सवस्य संयोजनं तथा वार्षिक-प्रतिवेदनप्रस्तुतिश्च। |
| 2 | 12-14.09.2019 | विश्वविद्यालयानुदानपद्धत्या कोलकाता-कालेज-प्रशासनेन प्रायोजिताया सेट्-परीक्षा-प्रश्नपत्र-निर्माण-कार्यशालायां विशेषज्ञत्वेन भागग्रहणम्। |
| 3 | 17-18.09.2019 | मेदिनापुर-स्वयंशासिते स्नातकोत्तरे महाविद्यालये 'समाजोपरि संस्कृतस्य प्रभावः' इत्यस्यां राष्ट्रियसंगोष्ठ्याम् उद्घाटनसत्रे विशिष्टव्याख्यानपूर्वकं सत्राध्यक्षत्वं निर्व्यूढम्। |
| 4 | -.9.2019 | परिसरे समायोजिते संस्कृत-सप्ताहोत्सवे समन्वयकत्वं निर्व्यूढम्। |
| 5 | 14-28.9.2019 | परिसरे आयोजिते हिन्दी-पक्षोत्सवे मुख्य संयोजकत्वं निर्व्यूढम्। |
| 6 | 17-18.10.2019 | श्रीरघुनाथकीर्तिपरिसरे राज्यस्तरीयस्पर्धासु निर्णायकत्वं निर्व्यूढम्। |
| | - | एतदवधौ कथासरितः 27-28 अङ्कयोः सम्पादनम्। |
| | - | एतदवधौ पद्यबन्धायाः 14-15 अङ्कयोः प्रधानसम्पादकदायित्वनिर्वहणम्। |
| | - | एतदवधौ द्वयोः शोधच्छात्रयोः शोधप्रबन्धप्रस्तुतौ मार्गदर्शनम्। |
| | - | स्तोत्रकाव्यं नवदुर्गीयणम् प्रकाशितम् (पद्यबन्धा-14) |
| | - | भ्रमणकाव्यं - प्रयागप्रयाणम् प्रकाशितम् (पद्यबन्धा-15) |
| | - | नैकानि शोधपत्राणि, नैकाः कविताः कथाश्च विविध-पत्र-पत्रिकासु प्रकाशिताः |
| | - | राजनारायणीयम् इति शीर्षकान्वितः स्मृतिग्रन्थः सम्पादितः। |



### ✍डॉ. कृपाशङ्करशर्मा

1 संस्कृतसप्ताहोत्सवस्य संयोजकपदं निर्व्यूढम्।

2 29 अगस्तत: 04 सितम्बरपर्यन्तं लघुअवधिपाठ्यक्रमे कुमायूँविश्वविद्यालये नैनीतालनगरे भागग्रहणम्।

3 म.सा.रा.वे.प्र. उज्जयिनी एवं उ.ख.सं.वि.वि. हरिद्वारम् इत्यनयो: संयुक्ततत्त्वाधाने 30.11.19 दिनाङ्के आयोजितायां शोधसङ्गोष्ठ्यां शोधपत्रवाचनम्।

4 सप्तदिवसीयनाट्यकार्यशालायां (19.11.19 त: 25.11.19 पर्यन्तम्) नाट्यनिर्देशकत्वेनोपवेशनम्।

5 राज्यस्तरीयस्पर्धायां (17.10.19त: 18.10.19 पर्यन्तं) संयोजकत्वेनोपस्थिति:।

### डा.शैलेन्द्रप्रसादउनियाल:

1 संस्कृतसप्ताहोत्सवे (16.08.19 त: 22.08.19 पर्यन्तं) काव्यपाठ:, निर्णायकत्वञ्च।

2 स्वतन्त्रतादिवसोत्सवे अगस्त 15 दिनाङ्के काव्यपाठ: सम्पादित:।

3 गणेशोत्सवे परिसरे श्रीगणेशपूजनस्य आयोजनम्।

4 म.सा.रा.वे.प्र. उज्जयिनी एवं उ.ख.सं.वि.वि. हरिद्वारम् इत्यनयो: संयुक्ततत्त्वाधाने 30.11.19 दिनाङ्के आयोजितायां शोधसङ्गोष्ठ्यां शोधपत्रवाचनम्।

5 सप्तदिवसीयनाट्यकार्यशालायां (19.11.19 त: 25.11.19 पर्यन्तं )नाट्यसहनिर्देशकत्वेनोपवेशनम्।

### डा. अनिलकुमार:

1 13.11.19 तमे दिनाङ्के श्रीरघुनाथपरिसरस्य साहित्यविभागे सहायकाचार्यत्वेन कार्यभारग्रहणम्।

2 सप्तदिवसीयनाट्यकार्यशालायां (19.11.19 त: 25.11.19 पर्यन्तं) नाट्यसहनिर्देशकत्वेनोपवेशनम्।

3 13.12.19 दिनाङ्कात् आयोजितायां सत्रार्धपरीक्षायां निरीक्षकत्वेनोपस्थिति:।

4 21.12.19.त: 26.12.19 पर्यन्तम् अगरतलायां नवोन्मेषकार्यशालायामुपवेशनम्।

### डॉ.श्रीओमशर्मा:

राष्ट्रियसंस्कृतसंस्थानस्य विद्यावारिध्युपाधिलाभ:। विषय: 'सिद्धान्तरत्नाकर-कौमुदीमूलार्थ-विद्योतिन्यो: कारकान्तभागस्य तुलनात्मकं समीक्षात्मकञ्चाध्ययनम्।






अन्ताराष्ट्रिया सङ्गोष्ठी
(International Seminar)
संस्कृतसाहित्ये बौद्धपरम्परायाः योगदानम्
(Contribution of Buddhist Tradition to Sanskrit literature)
30-31 जनवरी, 2019
साहित्यविभागः
राष्ट्रियसंस्कृतसंस्थानम्






विशिष्टव्याख्यान
प्रो. राधामाधव भारद्वाज


व्याकरणविभागीया द्विदिवसीया
अन्ताराष्ट्रिया सङ्गोष्ठी
(Turning points in the concept of Samāsaśakti)
एवं






ज्योतिषविभागीया द्विदिवसीया
अन्ताराष्ट्रिया सङ्गोष्ठी
देववास्तुविमर्शः
(01-02 फरवरी, 2019)
एवं
विशिष्टव्याख्यानमाला
(वास्तुशास्त्रस्य लोकोपयोगित्वम्)
01 फरवरी, 2019













